# Tripuratilakam

# ત્રિપુરાતિલકમ્

## Document Information

Text title : tripurAtilakam or kalpashAkhistavah)

File name : tripurAtilakam.itx

Category : devii, dashamahAvidyA, devI, panchadashI

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

# ત્રિપુરાતિલકમ્

શ્રીગણેશાય નમઃ ।
ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।
કલ્પશાખિગણસત્પ્રસૂનમધુપાનકેલિકુતુકભ્રમત્
ષટ્પદારવમનોહરે કનકભૂધરે લલિતમણ્ડપે ।
અત્યુદારમણિપીઠમધ્યવિનિવાસિનીમખિલમોહિનીં
ભક્તિયોગસુલભાં ભજે ભુવનમાતરં ત્રિપુરસુન્દરીમ્ ॥ ૧॥

એકકાલસમુદીયમાનતરુણાર્કકોટિસદૃશસ્ફુર-
દ્દેહકાન્તિભરધોરણીમિલનલોહિતીકૃતદિગન્તરામ્ ।
વાગધીતવિભવાં વિપદ્ધભયદાયિનીમખિલમોહિનીં
આગમાર્થમણિદીપિકામનિશમાશ્રયે ત્રિપુરસુન્દરિમ્ ॥ ૨॥

ઈષદુન્મિષદમર્ત્યશાખિકુસુમાવલીવિમલતારકા-
વૃન્દસુન્દરસુધાંશુખણ્ડસુભગીકૃતાતિગુરુકૈશિકામ્ ।
નીલકુઞ્ચિતઘનાલકાં નિટિલભુષણાયતવિલોચનાં
નીલકણ્ઠસુકૃતોન્નતિં સતતમાશ્રયે ત્રિપુરસુન્દરીમ્ ॥ ૩॥

લક્ષ્મહીનવિધુલક્ષનિર્જિતવિચક્ષણાનનસરોરુહાં
ઇક્ષુકાર્મુકશરાસનોપમિતચિલ્લિકાયુગમતલ્લિકામ્ ।
લક્ષયે મનસિ સન્તતં સકલદુષ્કૃતક્ષયવિધાયિનીં
ઉક્ષવાહનતપોવિભૂતિમહદક્ષરાં ત્રિપુરસુન્દરીમ્ ॥ ૪॥

હ્રીમદપ્રમદકામકૌતુકકૃપાદિભાવપિશુનાયત-
સ્નિગ્ધમુગ્ધવિશદત્રિવર્ણવિમલાલસાલસવિલોચનામ્ ।
સુન્દરાધરમણિપ્રભામિલિતમન્દહાસનવચન્દ્રિકાં
ચન્દ્રશેખરકુટુમ્બિનીમનિશમાશ્રયે ત્રિપુરસુન્દરીમ્ ॥ ૫॥

હસ્તમૃષ્ટમણિદર્પણોજ્જ્વલમનોજ્ઞદણ્ડફલકદ્વયે
બિમ્બિતાનુપમકુણ્ડલસ્તબકમણ્ડિતાનનસરોરુહામ્ ।

સ્વર્ણપઙ્કજદલાન્તરુલ્લસિતકર્ણિકાસદૃશનાસિકાં
    કર્ણવૈરિસખસોદરીમનિશમાશ્રયે ત્રિપુરસુન્દરીમ્ ॥ ૬॥

સન્મરન્દરસમાધુરીતુલનકર્મઠાક્ષરસમુલ્લસ-
    ન્નર્મપેશલવચોવિલાસપરિભૂતનિર્મલસુધારસામ્ ।
કમ્રવક્ત્રપવનાગ્રહપ્રચલદુન્મિષદ્ભ્રમરમણ્ડલાં
    તુર્મહે મનસિ શર્મદામનિશમમ્બિકાં ત્રિપુરસુન્દરીમ્ ॥ ૭॥

કમ્રકાન્તિજિતતારપૂરમણિસૂત્રમણ્ડલસમુલ્લસત્
    કણ્ઠકાણ્ડકમનીયતાપહૃતકમ્બુરાજરુચિડમ્બરામ્ ।
કિઞ્ચિદાનતમનોહરાં સયુગચુમ્બિચારુમણિકર્ણિકાં
    પઞ્ચબાણપરિપન્થિપુણ્યલહરીં ભજે ત્રિપુરસુન્દરીમ્ ॥ ૮॥

હસ્તપદ્મલસદિક્ષુચાપસૃણિપાશપુષ્પવિશિખોજ્જ્વલાં
    તપ્તહેમરચિતાભિરામકટકાઙ્ગુલીયવલયાદિકામ્ ।
વૃત્તનિસ્તુલનિરન્તરાલકઠિનોન્નતસ્તનતૃણીભવ-
    ન્મત્તહસ્તિવરમસ્તકાં મનસિ ચિન્તયે ત્રિપુરસુન્દરીમ્ ॥ ૯॥

લક્ષગાઢપરિરમ્ભતુષ્ટહરહાસગૌરતરલોલ્લસત્
    ચારુહારનિકરાભિરામકુચભારતાન્તતનુમધ્યમામ્ ।
રોમરાજિલલિતોદરીમધિકનિમ્નનાભિમવલોકયે
    કામરાજપરદેવતામનિશમાશ્રયે ત્રિપુરસુન્દરીમ્ ॥ ૧૦॥

હીરમણ્ડલનિરન્તરોલ્લસિતજાતરૂપમયમેખલા
    ચારુકાન્તિપરિરમ્ભસુન્દરસુસૂક્ષ્મચીનવસનાઞ્ચિતામ્ ।
મારવીરરસચાતુરીધૃતધુરીણતુઙ્ગજઘનસ્થલાં
    ધારયે મનસિ સન્તતં ત્રિદશવન્દિતાં ત્રિપુરસુન્દરીમ્ ॥ ૧૧॥

સપ્તસપ્તકિરણાનભિજ્ઞપરિવર્ધમાનકદલીતનુ-
    સ્પર્ધિમુગ્ધમધુરોરુદણ્ડયુગમન્દિતેન્દુધરલોચનામ્ ।
વૃત્તજાનુયુગવલ્ગુભાવજિતચિત્તસમ્ભવસમુદ્ગકાં
    નિત્યમેવ પરિશીલયે મનસિ મુક્તિદાં ત્રિપુરસુન્દરીમ્ ॥ ૧૨॥

કણ્ઠકાણ્ડરુચિકુણ્ડતાકરણલીલયા સકલકેકિનાં
    જઙ્ઘયા તુલિતકેતકીમુકુલસઙ્ઘયા ભૃતમુદઞ્ચિતામ્ ।
અમ્બુજોદરવિડમ્બિચારુપદપલ્લવાં હૃદયદર્પણે
    બિમ્બિતામિવ વિલોકયે સતતમમ્બિકાં ત્રિપુરસુન્દરીમ્ ॥ ૧૩॥

લભ્યમાનકમલાર્ચનપ્રણતિતત્પરૈરનિશમાસ્થયા
  કલ્પકોટિશતસઞ્ચિતેન સુકૃતેન કૈશ્ચન નરોત્તમૈઃ ।
કલ્પશાખિગણકલ્પ્યમાનકનકાભિષેકસુભગાકૃતિં
  કલ્પયામિ હૃદિ ચિત્પયોજનવષટ્પદીં ત્રિપુરસુન્દરીમ્ ॥ ૧૪॥

હ્રીમિતિ પ્રથિતમન્ત્રમૂર્તિરચલાત્મજેત્યુદધિકન્યકે-
  ત્યમ્બુજાસનકુટુમ્બિનીતિ વિવિધોપગીતમહિમોદયામ્ ।
સેવકાભિમતકામધેનુમખિલાગમાવગમવૈભવાં
  ભાવયામિ હૃદિ ભાવિતાખિલચરાચરાં ત્રિપુરસુન્દરીમ્ ॥ ૧૫॥

સ્તોત્રરાજમમુમાત્તમોદમહરાગમે પ્રયતમાનસો
  કીર્તયન્નિહ નરોત્તમો વિજિતવિત્તપો વિપુલસમ્પદામ્ ।
પ્રાર્થ્યમાનપરિરમ્ભકેલિરબલાજનૈરપગતૈષણો
  ગાત્રમાત્રપતનાવધાવમૃતમક્ષરં પદમવાપ્નુયાત્ ॥

ઇતિ ત્રિપુરાતિલકસ્તોત્રં સમાપ્તમ્ ॥

કલ્પશાખિસ્તવઃ

Proofread by PSA Easwaran

---

*Tripuratilakam*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*